"देवदारु स्नुतं दारुभद्रं दार्व्विन्द्रदारु च ।
मस्तदारुद्रुकिलिमं क्वचिमं सुरभूरुहः" ॥)

इन्द्रद्रुः, पुं, (इन्द्रस्य द्रुर्वृक्षः ।) अर्ज्जुनवृक्षः । इत्यमरः ॥ कुटजवृक्षः । इति राजनिर्घण्टः ॥

इन्द्रद्रुमः, पुं, (इन्द्रस्य द्रुमो वृक्षः ।) अर्ज्जुनवृक्षः । इति शब्दरत्नावली ॥

इन्द्रनीलः, पुं, (इन्द्रवत् नीलः ।) मरकतमणिः । इति हेमचन्द्रः ॥ पान्ना इति भाषा । (अस्य परीक्षा यथा, चिन्तामणिधृतवचनम् ।
"क्षीरमध्ये क्षिपेत् नीरं क्षीरञ्चेत् नीलतां व्रजेत् ।
इन्द्रनीलमिति ख्यातं तदाहि रत्नकोविदैः" ॥
"क्वचित् प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा" ॥
इति रघुवंशे । १३ । ५४ । यथा, भावप्रकाशः ॥
अथ इन्द्रनीलगोमेदयोर्नामानि ।
"नीलन्त्विन्द्रनीलञ्च गोमेदः पीतरत्नकम्" ।)

इन्द्रनीलकः, पुं, (इन्द्रनील + स्वार्थे कन् ।) मरकतमणिः । इति शब्दरत्नावली ॥

इन्द्रपुष्पा, स्त्री, (इन्द्रनीलवत् पुष्पं यस्याः ।) लाङ्गलिकीवृक्षः । इति रत्नमाला ॥ विषलाङ्गला इति ख्याता । (लाङ्गलिकीशब्देऽस्या विवरणं ज्ञेयं ।)

इन्द्रपुष्पिका, स्त्री, (इन्द्रपुष्पैव । कन् ।) कलिकारी । इति राजनिर्घण्टः ॥ विषलाङ्गला इति भाषा ।

इन्द्रप्रस्थं, क्ली, (इन्द्रस्य इन्द्रकीलस्य प्रस्थम् इव ।) राजयुधिष्ठिरनिर्म्मितनगरम् । अधुना दिल्ली इति ख्यातम् । (यथा, महाभारते १ । २०८ । २८ ।
"ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः ।
नगरं मापयामासुर्द्वैपायनपुरोगमाः ॥
सागरप्रतिरूपाभिः परिखाभिरलङ्कृतं" ॥
"तत्त्रिविष्टपसङ्काशं इन्द्रप्रस्थं व्यरोचत ।
मेघवृन्दमिवाकाशे विद्धं विद्युत्समावृतम्" ॥)

इन्द्रप्रहरणं, क्ली, (इन्द्रस्य प्रहरणम् ।) इन्द्रस्यास्त्रम् । वज्रम् । इति हलायुधः ॥

इन्द्रभेषजं, क्ली, (इन्द्रं महत् भेषजम् ।) शुण्ठी । इति शब्दरत्नावली ॥

इन्द्रमहकामुकः, पुं, (इन्द्रमहं कामयते इति । इन्द्रमह + काम + उकञ् ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

इन्द्रयवः, पुं, क्ली, (इन्द्रस्य इन्द्रवृक्षस्य यवः यवाकारबीजत्वात् तथात्वम् ।) स्वनामख्याततिक्तबीजविशेषः । तत्पर्य्यायः । कलिङ्गम् २ भद्रयवम् ३ । इत्यमरः ॥ शक्राह्वः ४ शक्रबीजम् ५ वत्सकः ६ वत्सकबीजम् ७ मद्रजः ८ कुटजः ९ कुटजबीजम् १० कलिङ्गबीजम् ११ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । कफवातरक्तपित्तहरत्वम् । दाहातिसारशमनत्वम् । ज्वरदोषशूलमूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ कुड़चिर विचि इति भाषा । यथा,—
"उक्तं कुटजबीजन्तु यवमिन्द्रयवं तथा ।
कलिङ्गञ्चापि कालिङ्गं तथा भद्रयवं स्मृतम्" ॥
इति क्लीवे अमरः प्राह ।
"क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम् ।
फलानीन्द्रयवास्तस्य तथा भद्रयवा अपि" ॥
इति धन्वन्तरिः प्राह ।
"ऐन्द्रं यवं त्रिदोषघ्नं संग्राहि कटु शीतलम् ।
ज्वरातीसाररक्तार्शःकृमिविसर्पकुष्ठनुत् ।
दीपनं गुदकीलास्रवातास्रश्लेष्मशूलजित्" ।
इति भावप्रकाशः ॥ (यथा, वैद्यकद्रव्यगुणः ।
"तद्बीजं ज्वरजित्तिक्तं रक्तपित्तातिसारजित्" ।)

इन्द्रलुप्तं, क्ली, (इन्द्रायां इन्द्रनीलवर्णकेशानां लुप्तं लोपो यस्मात् ।) केशरोगविशेषः । टाक इति भाषा । तस्य लक्षणम् ।
"रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ॥
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः ।
तदिन्द्रलुप्तं खालत्यं रुज्येति च विभाव्यते" ॥
इति निदानम् ॥ खालत्यं रुज्येति च तस्य पर्य्यायकथनम् । तथाच भोजः ।
"तदिन्द्रलुप्तमित्याहुः खर्ल्लो रुज्याञ्च केचन" ।
कार्त्तिकस्त्वाह । "इन्द्रलुप्तं श्मश्रुणि भवति खालत्यं शिरस्येव रुज्या सवेदनेति आगमस्तत्र नास्ति" ॥
इति तट्टीका ॥ अथेन्द्रलुप्तस्य चिकित्सा ।
"तिक्तपटोलीपत्रस्वरसैर्घृष्टा शमं याति ।
चिरकालजापि रुज्या नियतं दिवसत्रयेणैव ॥
गोक्षुरस्तिलपुष्पाणि तुल्यञ्च मधुसर्पिषः ।
शिरः प्रलेपितं तेन केशैः समुपचीयते ॥
हस्तिदन्तमसीं कृत्वा छागीदुग्धरसाञ्जनः ।
लोमान्यनेन जायन्ते लेपात् पाणितलेष्वपि ॥
यष्टीन्दीवरमृद्वीकातैलाज्यक्षीरलेपनैः ।
इन्द्रलुप्तं शमं याति केशाः स्युश्च घना दृढ़ाः ॥
जातीकरञ्जवरुणकरवीराग्निपाचितम् ।
तैलमभ्यञ्जनाद्धन्ति इन्द्रलुप्तं न संशयः ॥
स्नुहीपयः पयोऽर्कस्य लाङ्गलीमार्कवो विषम् ।
अजामूत्रं सगोमूत्रं रक्तिका सेन्द्रवारुणी ॥
सिद्धार्थकस्तीक्ष्णगन्धा सम्यगेभिर्विपाचितम् ।
तैलं भवति नियमात् खालित्यव्याधिनाशनम् ॥
स्नुहीदुग्धादितैलम्" । इति भावप्रकाशः ॥
("केशघ्नस्य चिकित्सान्तु प्रवक्ष्ये हारीत ! साम्प्रतम् ।
रूक्षं सपाण्डुरं वातात् पित्तात्तप्तं सदाहकम् ॥
कफान्वितं भवेत् स्निग्धं रक्तात्पाकं व्रजन्ति तत् ।
सन्निपातेन सदृशं जायते सर्व्वलक्षणम्" ॥
अस्य चिकित्सा यथा ॥ * ॥
"गुड़ेन सुरसा शुण्ठी मातुलुङ्गरसेन तु ।
केशघ्ने वातसम्भूते धावनञ्च प्रशस्यते ॥ १ ॥
त्रिफलाञ्च वचां शुण्ठीं गुड़ेनापि प्रपेषितम् ।
धावनं कफसम्भूते चेन्द्रलुप्ते प्रशस्यते ॥ २ ॥
पैत्तिके च हितं दुग्धं नवनीतान्वितन्तथा ।
सिताशिवाफलं यष्टी पैत्तिके धावनं मतम् ॥ ३ ॥
भृङ्गराजरसं ग्राह्यं शृङ्गवेररसन्तथा ।
सौवीरकरसेनापि तिलान् पिष्ट्वा प्रलेपनम् ॥
पश्चात् कार्य्यं पूरणेन स्नानमुष्णेन वारिणा ।
धवार्ज्जुनकदम्बस्य शिरीषमपि रोहितम् ॥
क्वाथमेषां शिरोदद्रून् शमयेदिन्द्रलुप्तकम् ।
कुरूवकस्य पुष्पेण जयायाः कुसुमेन च ॥
घृतस्य चेन्द्रलुप्तस्य कृतमेव निवारणम् ।
पैत्तिकानि च लिङ्गानि दृष्ट्वा दुग्धेन धावनम् ॥
शीतलानि प्रदेयानि पैत्तिकेन विधीयते" ॥
"धुस्तूरपत्राणि च मागधीनां
निशा विशालागृहधूमकुष्ठम् ।
घृतेन युक्तञ्च जलेन पिष्टं
शिरःप्रलेपे क्षतवारणं स्यात् ॥
पित्ते क्षते दोषयुते च रोगे
पटोलपत्रं पिचुमर्द्दकं वा ।
तथामलक्या फलमेव पिष्ट्वा
घृतेन खण्डेन प्रलेपनञ्च ॥
निवार्य्यते मस्तकजं क्षतञ्च
शिरोर्त्तिसङ्घान् विनिहन्ति चैतत् ।
गजेन्द्रदन्तस्य मसीं गृहीत्वा
प्रलेपनं वा नवनीतकेन ॥
तिलार्कभल्लातकदग्धमाष-
क्षारस्य लेपो नवनीतकेन ।
सर्पस्य क्षारस्य तथा प्रयोगः
खल्लाटके केशचयं करोति" ॥
इति हारीतः ॥
"तेजोऽनिलाद्यैः सहकेशभूमिम्
दग्ध्वाशु कुर्य्यात् खलतिन्नरस्य" ॥ * ॥
चिकित्सा यथा चरके ।
"खालत्ये पलिते वल्यां हरिल्लोम्नि च शोधितम् ।
नस्यैस्तैलैः शिरोवक्त्रप्रलेपैश्चाप्युपाचरेत् ॥
सिद्धं विदारीगन्धाद्यैर्जीवनीयैरथापि च ।
नस्यं स्यादणुतैलं वा खालत्यपलितापहम्" ॥)

इन्द्रलुप्तः, पुं, (इन्द्रायां इन्द्रनीलवत् केशानां लुप्तं नाशो यस्मात् ।) केशनाशकरोगः । तत्पर्य्यायः । इन्द्रलुप्तकः २ केशघ्नः ३ । इति राजनिर्घण्टः ॥

इन्द्रलुप्तकं, क्ली, (इन्द्रलुप्त + स्वार्थे कन् ।) इन्द्रलुप्तरोगः । इति भूरिप्रयोगो जटाधरहेमचन्द्रौ च ॥

इन्द्रवारुणिका, स्त्री, (इन्द्रवारुणी + कन् + टाप् ।) इन्द्रवारुणीलता । इति शब्दचन्द्रिका ॥

इन्द्रवारुणी, स्त्री, (इन्द्रं वारयति । इन्द्र + वृ + णिच् + उन् । ङीप्) लताविशेषः । राखाल ससा इति भाषा ॥ तत्पर्य्यायः । विशाला २ । इत्यमरः ॥ ऐन्द्री ३ चित्रा ४ गवाक्षी ५ गजचिर्भटा ६ मृगेर्व्वारु ७ पिटङ्गीकी ८ मृगादनी ९ । इति रत्नमाला ॥ इन्द्रा १० अरुणा ११ गवादनी १२ क्षुद्रसहा १३ इन्द्रचिर्भिटी १४ सूर्य्या १५ विषघ्नी १६ गणकर्णिका १७ अमरा १८ माता १९ सुकर्षी २० सुफला २१ तारका २२ वृषभाक्षी २३ पीतपुष्पा २४ इन्द्रवल्लरी २५ हेमपुष्पी २६ क्षुद्रफला २७ वारुणी २८ बालकप्रिया २९ रक्तैर्व्वारुः ३० विषलता ३१ शक्रवल्ली ३२ विषापहा ३३ अमृता ३४ विषवल्ली ३५ । चित्रफला ३६ । इति जटाधरः ॥ अपि च ।
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
वारुणी च पराप्युक्ता सा विशाला महाफला ॥
श्वेतपुष्पा मृगाक्षी च मृगैर्व्वारुर्मृगादनी ।
गवादनीद्वयं तिक्तं पाके कटुरसं लघु ॥
वीर्य्योष्णं कामलापित्तकफप्लीहोदरापहम् ।